# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- ऑक्टोबर-२०१९

कक्षा -**आचार्य-२ सेमेस्टर३ (New)** **प्रश्नपत्रम्- ४** गुणाः - ७०

विषयः - नव्यव्याकरणम् कोड – C.C.5.3.9 समयः - ३:०० तः ६:००

दिनाङ्कः – १२/१०/२०१९ ग्रन्थः – वाक्यपदीयम्

---

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १ कस्याः अपि एकस्याः कारिकायाः व्याख्यां कुरुत** **05**

१. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

२. भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते॥

**प्रश्नः २ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम्** **10**

१. वाक्यपदीयानुसारं शब्दब्रह्मणः वर्णनं कुरुत।

२. वाक्यपदीयानुसारं वेदमाहात्म्यं ज्ञापयत।

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ३ कस्याः अपि एकस्याः कारिकायाः व्याख्यानं विधेयम्** **05**

१. यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते॥

२. नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः॥

**प्रश्नः ४ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम्** **10**

१. वाक्यपदीयानुसारं शब्द-अर्थ-सम्बन्ध-फल-अन्वाख्यानपद्धतीनां द्वैविध्यं प्रतिपादयत।

२. केवलम् अनुमानप्रमाणस्य वैयर्थ्यं वाक्यपदीयानुसारं साधयत।

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ५ कस्याः अपि एकस्याः कारिकायाः व्याख्यानं विधेयम्** **05**

१. चैतन्यमिव यश्चायमविच्छेदेन वर्तते।
आगमस्तमुपासीनो हेतुवादैर्न बाधते॥
२. तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्॥

**प्रश्नः ६ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम्** **10**

१. वाक्यपदीयानुसारं ध्वनि-स्फोटयोः स्वरूपे स्पष्टयत।
२. शाब्दबोधे शब्दोऽपि विषयः इति एतत् स्पष्टीकुरुत।

**चतुर्थान्वितिः (युनिट - ४)**

**प्रश्नः ७ कस्याः अपि एकस्याः कारिकायाः व्याख्यानं विधेयम्** **05**

१. यो य उच्चार्यते शब्दो नियतं न स कार्यभाक्।
अन्यप्रत्यायने शक्तिर्नतस्य प्रतिबध्यते॥
२. कार्यत्वे नित्यतायां वा केचिदेकत्ववादिनः।
कार्यत्वे नित्यतायां वा केचिन्नानात्ववादिनः॥

**प्रश्नः ८ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम्** **10**

१. शब्दानां ग्राह्यत्व-ग्राहकत्वे द्वे शक्ती स्तः इति वाक्यपदीयमतं स्पष्टयत।
२. 'स्वं रूपम्..' इति सूत्रस्य वाक्यपदीयदिशा विश्लेषणं कार्यम्।

प्रथमान्वितितः चतुर्थान्वितिः (युनिट - १-४)

**प्रश्नः ९ केषामपि दशानाम् एकैकवाक्यैः उत्तराणि लेख्यानि** **10**

१. किम् एकम् एव आम्नातम्?
२. कालः कस्य शक्तिः वर्तते?
३. शब्दब्रह्मणः प्राप्तुपायः कः?
४. सत्या विशुद्धिः कुत्र उक्ता?
५. वाक्यपदीयानुसारं व्याकरणशास्त्रे द्विविधाः शब्दाः के?
६. वाक्यपदीयानुसारं साधुशब्दज्ञानस्य फलद्वयं किम्?
७. शिष्टेभ्यः आगमात् के सिद्धाः?
८. ऋषीणां ज्ञानं कीदृशम्?
९. वाग्व्यवहारकाले ध्वनिना कः अनुगृह्यते?
१०. तोयक्रियावशात् तत्प्रवृत्तिं किम् अन्वेति?

११.	अर्थोपसर्जनीभूताः के?

१२.	तेजसो द्वे शक्ती के?

१३.	उच्चरन् शब्दः परतन्त्रत्वात् कैः न युज्यते?

१४.	कीदृशैः शब्दैः अर्थः न प्रकाश्यते?

१५.	व्याकरणशास्त्रे शब्दस्य अर्थः शब्दः वा अर्थः वा?

***